# पुरुष सूक्तम्

# *puruṣa sūktam*

ॐ तच्छंयोरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये ।

*om tacchaṁyorāvṛṇīmahe | gātuṁ yajñāya | gātuṁ yajñapataye |*

दैवी स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् ।

*daivī svastirastu naḥ | svastirmānuṣebhyaḥ | ūrdhvaṁ jigātu bheṣajam |*

शं नो अस्तु द्विपदे । शं चतुष्पदे ॥

*śaṁ no astu dvipade | śaṁ catuṣpade ||*

ॐ शान्तिः शान्तिः शान्तिः ॥

*om śāntiḥ śāntiḥ śāntiḥ ||*

सहस्रशीर्षा पुरुषः । सहस्राक्षः सहस्रपात् ।

*sahasraśīrṣā puruṣaḥ | sahasrākṣaḥ sahasrapāt |*

स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशाङ्गुलम् ॥

*sa bhūmiṁ viśvato vṛtvā | atyatiṣṭhaddaśāṅgulam ||*

पुरुष एवेदग्ं सर्वम् । यद्भूतं यच्च भव्यम् ।

*puruṣa evedagṁ sarvaṁ | yadbhūtaṁ yacca bhavyaṁ |*

उतामृतत्वस्येशानः । यदन्नेनातिरोहति ॥

*utāmṛtatvasyeśānaḥ | yadannenātirohati ||*

एतावानस्य महिमा । अतो ज्यायाग्श्च पूरुषः ।

*etāvānasya mahimā | ato jyāyāgśca pūruṣaḥ |*

पादोऽस्य विश्वा भूतानि । त्रिपादस्यामृतं दिवि ॥

*pādō'sya viśvā bhūtāni | tripādasyāmṛtaṁ divi ||*

त्रिपादूर्ध्व उदैत्पुरुषः । पादोऽस्येहाऽऽभवात्पुनः ।

*tripādūrdhva udaitpuruṣaḥ | pādō'sye hā''bhavātpunaḥ |*

ततो विष्वङ्व्यक्रामत् । साशनानशने अभि ॥

*tato viṣvaṅvyakrāmat | sāśanānaśane abhi ||*

तस्माद्विराडजायत । विराजो अधि पूरुषः ।

*tasmādvirāḍajāyata | virājo adhi pūruṣaḥ |*

स जातो अत्यरिच्यत । पश्चाद्भूमिमथो पुरः ॥

*sa jāto atyaricyata | paścādbhūmimatho puraḥ ||*

यत्पुरुषेण हविषा । देवा यज्ञमतन्वत ।

*yatpuruṣeṇa haviṣā| devā yajñamatanvata |*

वसन्तो अस्यासीदाज्यम् । ग्रीष्म इध्मः शरद्धविः ॥

*vasanto asyāsīdājyam | grīṣma idhmaḥ śaraddhaviḥ ||*

सप्तास्यासन्परिधयः । त्रिः सप्त समिधः कृताः ।

*saptāsyāsanparidhayaḥ | triḥ sapta samidhaḥ kṛtāḥ |*

देवा यद्यज्ञं तन्वानाः । अबध्नन्पुरुषं पशुम् ॥

*devā yadyajñaṁ tanvānāḥ | abadhnanpuruṣaṁ paśum ||*

तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः ।

*taṁ yajñaṁ barhiṣi praukṣan | puruṣaṁ jātamagrataḥ |*

ते॑न दे॒वा अ॑यजन्त । सा॒ध्या ऋष॑यश्च॒ ये ॥

*tenȧ de̱vā ayȧjanta | sa̱dhyā ṛṣȧyaśca̱ ye ||*

तस्मा᳚द्य॒ज्ञात्स॑र्व॒हु॑तः । संभृ॑तं पृषदा॒ज्यम् ।

*tasmā̈dya̱jñātsȧrva̱hutȧḥ | saṁbhṛ̇taṁ pṛṣadā̱jyam |*

प॒शूग्स्ताग्श्च॑क्रे वाय॒व्या॑न् । आ॒रण्या॒न्ग्रा॒म्याश्च॒ ये ॥

*pa̱śūgstāgścȧkre vāya̱vyāṅ | ā̱ra̱ṇyāngrā̱myāśca̱ ye ||*

तस्मा᳚द्य॒ज्ञात्स॑र्व॒हु॑तः । ऋच॒ः सामा॑नि जज्ञिरे ।

*tasmā̈dya̱jñātsȧrva̱hutȧḥ | ṛca̱ḥ sāmȧni jajñire |*

छन्दा॑ग्ंसि जज्ञिरे॒ तस्मा᳚त् । यजु॒स्तस्मा॑दजायत ॥

*chandāġṁsi jajñire̱ tasmā̈t | yaju̱stasmȧdajāyata ||*

तस्मा॒दश्वा॑ अजायन्त । ये के चो॑भ॒या॑दतः ।

*tasmā̱daśvȧ ajāyanta | ye ke cȯbha̱yādȧtaḥ |*

गावो॑ ह जज्ञिरे॒ तस्मा᳚त् । तस्मा᳚ज्जा॒ता अ॑जा॒व॑यः ॥

*gāvȯ ha jajñire̱ tasmā̈t | tasmā̈jjā̱tā ȧjā̱vayȧḥ ||*

यत्पुरु॑ष॒ं व्य॑दधुः । क॒ति॒धा व्य॑कल्पयन् ।

*yatpuruṡa̱ṁ vyȧdadhuḥ | ka̱ti̱dhā vyȧkalpayan |*

मुख॒ं किम॑स्य॒ कौ बा॒हू । कावू॒रू पादा॑वुच्येते ॥

*mukha̱ṁ kimȧsya̱ kau bā̱hū | kāvū̱rū pādȧvucyete ||*

ब्रा॒ह्मणो᳚ऽस्य॒ मुख॑मासीत् । बा॒हू रा॑ज॒न्य॑ः कृ॒तः ॥

*brā̱hmaṇȯ̈'sya̱ mukhȧmāsīt | bā̱hūrȧja̱nyȧḥ kṛ̱taḥ ||*

ऊरू तदस्य यद्वैश्यः । पद्भ्यागं शूद्रो अजायत ॥

*ūrū tadásya yadvaiśyáḥ | padbhyāgṁ śūdro ájāyata ||*

चन्द्रमा मनसो जातः । चक्षोः सूर्यो अजायत ।

*candramā manáso jātaḥ | cakṣoḥ sūryóajāyata |*

मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुरजायत ॥

*mukhādindráścāgniścá| prāṇādvāyurájāyata ||*

नाभ्या आसीदन्तरिक्षम् । शीर्ष्णो द्यौः समवर्तत ।

*nābhyá āsīdantaríkṣam | śīrṣṇo dyauḥ samávartata |*

पद्भ्यां भूमिर्दिशः श्रोत्रात् । तथा लोकागं अकल्पयन् ॥

*padbhyāṁ bhūmirdiśaḥ śrotrā̎t | tathá lokāgṁ ákalpayan ||*

वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसस्तुपारे ।

*vedāhametaṁ purúṣaṁ mahānta̎m| ādityavárṇaṁ tamásastupāre |*

सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाऽभिवदन् यदास्ते ॥

*sarvā́ṇi rūpā́ṇi vicitya dhīráḥ | nāmā́ni kṛtvā'bhivadan yadāste̎ ||*

धाता पुरस्ताद्यमुदाजहार । शक्रः प्रविद्वान्प्रदिशश्चतस्रः ।

*dhātā purastādyamúdājahārá| śakraḥ pravidvānpradiśaścatásraḥ |*

तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते ॥

*tamevaṁ vidvānamṛtá iha bhávati | nānyaḥ panthā ayánāya vidyate ||*

यज्ञेन यज्ञमयजन्त देवाः । तानि धर्माणि प्रथमान्यासन् ।

*yajñenáya jñamáyajanta devāḥ | tāni dharmā́ṇi prathamānyásan |*

ते ह नाकं महिमानः सचन्ते । यत्र पूर्वे साध्याः सन्ति देवाः ॥

*te ha nākaṁ mahimānaḥ sacante | yatra pūrve sādhyāḥ santi devāḥ ||*

अद्भ्यः संभूतः पृथिव्यै रसाच्च । विश्वकर्मणः समवर्तताधि ।

*adbhyaḥ saṁbhūtaḥ pṛthivyai rasācca | viśvakarmaṇaḥ samavartatādhi |*

तस्य त्वष्टा विदधद्रूपमेति । तत्पुरुषस्य विश्वमाजानमग्रे ॥

*tasya tvaṣṭā vidadhadrūpameti | tatpuruṣasya viśvamājānamagre ||*

वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसः परस्तात् ।

*vedāhametaṁ puruṣaṁ mahāntam| ādityavarṇaṁ tamasaḥ parastāt |*

तमेवं विद्वानमृत इह भवति । नान्यः पन्था विद्यतेऽयनाय ॥

*tamevaṁ vidvānamṛta iha bhavati | nānyaḥ panthā vidyate'yanāya ||*

प्रजापतिश्चरति गर्भे अन्तः । अजायमानो बहुधा विजायते ।

*prajāpatiścarati garbhe antaḥ | ajāyamāno bahudhā vijāyate |*

तस्य धीराः परिजानन्ति योनिम् । मरीचीनां पदमिच्छन्ति वेधसः ॥

*tasya dhīrāḥ parijānanti yonim | marīcīnāṁ padamicchanti vedhasaḥ ||*

यो देवेभ्य आतपति । यो देवानां पुरोहितः ।

*yo devebhya ātapati | yo devānāṁ purohitaḥ |*

पूर्वो यो देवेभ्यो जातः । नमो रुचाय ब्राह्मये ॥

*pūrvo yo devebhyo jātaḥ | namo rucāya brāhmaye ||*

रुचं ब्राह्मं जनयन्तः । देवा अग्रे तदब्रुवन् ।

*rucaṁ brāhmaṁ janayantaḥ | devā agre tadabruvan |*

यस्त्वैवं ब्राह्मणो विद्यात्। तस्य देवा असन् वशे ॥

*yastvaivaṁ brāhmaṇo vidyāt | tasya devā asan vaśe ||*

ह्रीश्च ते लक्ष्मीश्च पत्न्यौ। अहोरात्रे पार्श्वे। नक्षत्राणि रूपम्।

*hrīśca te lakṣmīśca patnyau | ahorātre pārśve | nakṣatrāṇi rūpam |*

अश्विनौ व्यात्तम्। इष्टं मनिषाण। अमुं मनिषाण। सर्वं मनिषाण ॥

*aśvinau vyāttam| iṣṭaṁ maniṣāṇa | amuṁ maniṣāṇa | sarvaṁ maniṣāṇa ||*

ॐ तच्छंयोरावृणीमहे। गातुं यज्ञाय। गातुं यज्ञपतये।

*om tacchaṁyorāvṛṇīmahe | gātuṁ yajñāya | gātuṁ yajñapataye |*

दैवी स्वस्तिरस्तु नः। स्वस्तिर्मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजम्।

*daivī svastirastu naḥ | svastirmānuṣebhyaḥ | ūrdhvaṁ jigātu bheṣajam |*

शं नो अस्तु द्विपदे। शं चतुष्पदे ॥

*śaṁ no astu dvipade | śaṁ catuṣpade ||*

ॐ शान्तिः शान्तिः शान्तिः ॥

*om śāntiḥ śāntiḥ śāntiḥ ||*